# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – शास्त्री-3** | **प्रश्नपत्रम् – 6** | **गुणाः – ५०** |
| **विषयः – साहित्यम्** | **सत्रम् – 6** | **समयः – १० तः १२** |
| **दिनाङ्कः – १९/०७/२०२१** | **सन्दर्भग्रन्थः – किरातार्जुनीयम् १-२ सर्गौ** | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः ।**
**प्रत्येकं प्रश्नस्य समानगुणाः । (१०)**

**प्रश्नः १ टिप्पणीद्वयं लेख्यम् ।**

१ भारवेः जीवनपरिचयः ।
२ भारवेरर्थगौरवम् ।
३ किरातार्जुनीयस्य मङ्गलाचरणम् ।

**प्रश्नः २ किरातार्जुनीयस्य महाकाव्यत्वेन मूल्याङ्कनं कुरुत ।**

**प्रश्नः ३ किरातार्जुनीयस्य वैशिष्ट्यं लिखत ।**

**प्रश्नः ४ कयोरपि द्वयोः पद्ययोः ससन्दर्भं व्याख्या कार्या ।**

१ निसर्गदुर्बोधमबोधविक्लवाः क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥
२ वसूनि वाञ्छन्न वशी न मन्युना स्वधर्म इत्येव निवृत्तकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा निहन्ति दण्डेन स धर्मविप्लवम् ॥
३ अवन्ध्यकोपस्य विहन्तुरापदां भुवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥

**प्रश्नः ५ दुर्योधनस्य शासनव्यवस्थां विवेचयत ।**

**प्रश्नः ६ द्रौपद्याः मनोव्यथां वर्णयत ।**

**प्रश्नः ७ कयोरपि द्वयोः श्लोकयोः ससन्दर्भं व्याख्या कार्या ।**

१ द्विषतामुदयः सुमेधसा गुरुरस्वन्ततरः सुमर्षणः ।
न महानपि भूतिमिच्छता फलसम्पत्प्रवणः परीक्षयः ॥

२ अभिमानवतो मनस्विनः प्रियमुच्चैः पदमारुरुक्षतः ।
विनिपातनिवर्तनक्षमं मतमालम्बनमात्मपौरुषम् ॥

३ सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणुते हि विमुश्यकारिणं गुणलुब्धाः स्वमेव सम्पदः ॥

**प्रश्नः ८ भीमस्य उक्तीनां समीक्षां कुरुत ।**

**प्रश्नः ९ युधिष्ठिरस्य पात्रालेखनं कुरुत ।**

**प्रश्नः १० दशानाम् एकवाक्येन उत्तरं लिखत ।**

१ किरातार्जुनीये कति सर्गाः सन्ति ?
२ महाकवेः भारवेः समयः कः ?
३ हितैषिणः किं प्रवक्तुं नेच्छन्ति ?
४ किरातार्जुनीयस्य मुख्यरसः कः ?
५ किरातार्जुनीयस्य द्वितीये सर्गे कति श्लोकाः सन्ति ?
६ दुर्योधनः कस्मै युवराजपदं दत्तवान् ?
७ के पराभवं व्रजन्ति ?
८ किरातार्जुनीयस्य प्रथमसर्गस्यान्ते किं छन्दः ?
९ पराक्रमाश्रयाः समृद्धयः केन समं न निवसन्ति ?
१० द्रुपदात्मजा का ?
११ अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि इत्युक्तिः का कथयति ?
१२ यशोधनः कः ?
१३ आखण्डलशब्दस्य कोऽर्थः ?
१४ बहुच्छलाः श्रियः इति कस्योक्तिः अस्ति ?
१५ पराशरात्मजः कः ?

****